Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 128 विषय स्तोत्र

नाव. श्रीसूक्त (शंकराचार्यकृत)

लेखक/लिपीकार —

पृष्ठ 5 काळ — पूर्ण/अपूर्ण

५०

अथश्रीसूक्त मारंभ.

श्रीगणेशायनमः॥ ॥श्रीसरस्वत्यैनमः॥ ॥
श्रीगुरुभ्योनमः॥ ॥हरिः ॐ॥ हिरण्यवर्णांहरिणीं
सुवर्णरजतस्रजां॥ चंद्रांहिरण्मयीलक्ष्मींजा
तवेदोममावह॥ तांमऽआवहजातवेदोलक्ष्मी
मलपगामिनीं॥ यस्यांहिरण्यंविंदेयंगामश्वंपु-
रुषानहं॥ अश्वपूर्णांरथमध्यांहस्तिनादप्रमो-

श्रि· १

दिनीं॥ श्रियंदेवीमुपव्हयेश्रीर्मादेवीजुषतां॥ कां
सोस्मितांहिरण्यप्राकारामार्द्रोज्वलंतींतृप्तांत
र्पयंतीं॥ पद्मेस्थितांपद्मवर्णांतामिहोपव्हये
श्रियं॥ चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोके
देवजुष्टामुदारां॥ तांपद्मनेमींशरणमहंप्रपद्ये
अलक्ष्मीर्मेनश्यतांत्वामृणोमि॥ १॥ आदित्य-

सू· १

वर्णेतपसोधिजातोवनस्पतिस्तववृक्षाथबि-
ल्वः॥ तस्यफलानितपसानुदंतुमायांतराया
श्वबाह्याअलक्ष्मीः॥ उपैतुमांदेवसखःकीर्ति
श्वमणिनासह॥ प्रादुर्भूतोस्मिराष्ट्रेस्मिन्कीर्ति
वृद्धिंददातुमे॥ क्षुत्पिपासामलांज्येष्ठामल
क्ष्मींनाशयाम्यहं॥ अभूतिमसमृद्धिंचसर्वांनि

श्रि: २

र्णुदमेगृहात्॥ गंधद्वारांदुराधर्षांनित्यपुष्टांक-
रीषिणीं॥ ईश्वरींसर्वभूतानांतामिहोपव्हये
श्रियं॥ मनसः कामनाकूतिंवाचः सत्यमशीम-
हि॥ पशूनांरूपमन्नस्यमयिश्रीश्रयतांयशः
॥ २॥ कर्दमेनप्रजाभूतामयिसंभ्रमकर्दमा॥
श्रियंवासयमेकुलेमातरंपद्ममालिनीं॥ आप

सू: २

स्त्रजंतुस्निग्धानिचिक्लीतवसमेगृहे॥ नीचदे-
वीमातरंश्रियंवासयमेकुले॥ आर्द्रांपुष्करिणीं
पुष्टीस्कवर्णांहेममालिनीं॥ सूर्यांहिरण्मयील-
क्ष्मींजातवेदोममावह॥ आर्द्रांयःकरिणींयष्टीं
पिंगलांपद्ममालनीं॥चंद्राहिरण्मयींलक्ष्मींजा
तवेदोममावह॥ तांमआवहजातवेदोलक्ष्मीम

श्रि॰
३

लपगामिनीं ॥ यस्यां हिरण्यं प्रभूतिं गावो दाश्वो-
श्वान्विंदेयं पुरुषानहं ॥ ३ ॥ यः शुचिः प्रयतोभू-
त्वाजुहूयादाज्यमन्वहं ॥ श्रियः पंचदशर्चंचः
श्रीकामः सततंजपेत् ॥ पद्मानने पद्मनिपद्मने-
त्रे पद्मप्रिये पद्मदलायताक्षी ॥ विश्वप्रिये विश्व-
मनोनकुलेत्वत्पादपद्मंत्वद्दिसंनिधत्स्व ॥ पद्मानने

सू॰
३

पद्मऊरु पद्माक्षी पद्मसंभवेत् ॥ तन्मे भजसि पद्माक्षी
मांक्षिकागर्भसंभवे ॥ उच्चतेनमयांन्देवी ॥ येनसौख्यं
लभाम्यहं ॥ अश्वदायै गोदायै धनदायै महाधने
॥ धनंमेजुषतादेवींसर्वकामांश्च देहि मे ॥ पुत्रपौ-
त्रधनंधान्यंहस्त्यश्वादिगवेरथं ॥ प्रजानांभवसि-
माता आयुष्मंतंकरोतुमे ॥ धनमग्निर्धनंवायुर्धनं

श्रि॰
४

सूर्योधनंवसुः॥ धनमिंद्रोबृहस्पतिवरुणंधनमश्नुते॥ वैनतेयसोमंपिबसोमंपिबतुवृत्रहा॥ सोसोमंधनस्यसोमिनोमह्यंददातिसोमिनः॥ नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः॥ भवंतिकृतपुण्यानांभक्तानांश्रीसूक्तंजपेत्॥ सरसिजनिलयेसरोजहस्तेधवलतरांशुभगंधमाल्यशोभे॥

सूक्त
४

भगवतिंहरिवल्लभेमनोज्ञेत्रिभुवनभूतकरिप्रसीदमह्यं॥ विष्णुपत्नींक्षमांदेवींमाधवप्रियां॥ विष्णुप्रियसखींदेवींनमाम्यच्युतवल्लभां॥ महालक्ष्मीचविद्महेविष्णुपत्नीचधीमहि॥ तन्नोलक्ष्मीः प्रचोदयात्॥ श्रीवर्चस्वमायुष्यमारोग्यमाविधात्पवमानंमहीयते॥ धान्यंधनंपशुबहुपत्रलाभंशतसंवत्सरदीर्घमायुः॥

38
॥इति हिरण्यसूक्तं संपूर्णं॥